गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।सोमापूषणौ, ६ (अन्त्यार्धर्चस्य) अदितिः। त्रिष्टुप्।

**सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः।**

**जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम्॥ २.०४०.०१**

सोमापूषणा- सूर्याचन्द्रावित्याधिभौतिके। आध्यात्मिके तु सोमो धार्मिकरसः। पूषा पोषक आत्मा। रयीणाम्- दानयोग्यसम्पदाम्। जनना- जनकौ। दिवः पृथिव्याः- द्यावापृथिव्योः। जनना- जनकौ। जातौ- चित्तभावन उत्पन्नौ। विश्वस्य भुवनस्य- सर्वलोकस्य। गोपौ- रक्षकौ। देवाः। अमृतस्य नाभिम्- अमरणधर्मस्य हेतुम्। अकृण्वन्- कृतवन्तः॥१॥

**इमौ देवौ जायमानौ जुषन्तेमौ तमांसि गूहतामजुष्टा।**

**आभ्यामिन्द्रः पक्वमामास्वन्तः सोमापूषभ्यां जनदुस्रियासु॥ २.०४०.०२**

इमौ- एतौ। देवौ- द्योतनशीलौ। जायमानौ- उद्भूतौ। जुषन्त- द्योतनशक्तयः सेवन्ते। इमौ- एतौ। अजुष्टा- असेव्यानि। तमांसि। गूहत- नाशयतः। आभ्यां सोमापूषभ्याम्। इन्द्रः- ईशनाधिदेवता। पक्वम्- परिपक्वं क्षीरोपलक्षितं ज्ञानम्। अमासु- तरुणीषु। उस्रियासु- गोषु। चिद्रश्मिष्विति भावः। जनत्- जनयति। तत्स्थितं ज्ञानं प्रकटयतीति भावः॥२॥

**सोमापूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम्।**

**विषूवृतं मनसा युज्यमानं तं जिन्वथो वृषणा पञ्चरश्मिम्॥ २.०४०.०३**

वृषणा- वर्षकौ। सोमापूषणा- सोमापूषणौ। रजसः- लोकस्य। विमानम्- परिच्छेदकम्। सप्तचक्रम्- सप्तकिरणाख्यचक्रम्। अविश्वमिन्वम्- विश्वस्यापरिच्छेद्यम्। विषूवृतम्- सर्वत्र

Dr. Rangan

WEBOLIM

परिवर्तमानम्। मनसा- चित्तभावनया। युज्यमानम्। पञ्चरश्मिम्- पञ्चर्तुरश्मिम्। तम्। रथम्। जिन्वथः- प्रेरयथः ॥३॥

**दिव्य१न्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे।**

**तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे॥ २.०४०.०४**

अन्यः- तयोरेकः पूषा। उच्चा- उच्छ्रिते। दिवि- नभसि चिदाकाश इत्यध्यात्मिके। सदनम्- सद्म। चक्रे- अकरोत्। अन्यः- इतरः सोमः। पृथिव्याम्- भूम्यामोषध्यात्मना। अध्यन्तरिक्षे- अन्तरिक्षे चन्द्रात्मना सदनं चक्रे। रसः सन् पृथिव्याख्यान्नमयकोशेऽन्तरिक्षाख्यप्राणमयकोशे च सदनं चक्र इत्यध्यात्मिके। तौ। अस्मभ्यम्- नः। पुरुवारम्- बहुभिर्वरणीयम्। पुरुक्षुम्- बहुकीर्तिम्। रायस्पोषम्- पुष्टिकरीं सम्पदम्। नाभिम्- मुख्याम्। अस्मे- अस्मभ्यम्। वि स्यताम्- विमुञ्चताम् ॥४॥

**विश्वान्यन्यो भुवना जजान विश्वमन्यो अभिचक्षाण एति।**

**सोमापूषणाववतं धियं मे युवाभ्यां विश्वाः पृतना जयेम॥ २.०४०.०५**

अन्यः- युवयोरेकः सोमः। विश्वानि- सर्वाणि। भुवनानि। जजान- आनन्देन ससर्ज। अन्यः- इतरः सूर्यः। विश्वम्- सर्वम्। अभिचक्षाणः- पश्यन्। एति- सरति। सोमापूषणौ- हे सूर्याचन्द्रौ। मे- मम। धियम्- बुद्धिम्। अवतम्- रक्षतम्। युवाभ्याम्। विश्वाः- सर्वाः। पृतनाः- शत्रुसेनाः। जयेम ॥५॥

**धियं पूषा जिन्वतु विश्वमिन्वो रयिं सोमो रयिपतिर्दधातु।**

**अवतु देव्यदितिरनर्वा बृहद्वदेम विदथे सुवीराः॥ २.०४०.०६**

विश्वमिन्वः- सर्वप्रीणयिता। पूषा- पोषकः सूर्यः। धियम्- बुद्धिम्। जिन्वतु- तर्पयतु। सोमः। रयिपतिः- अन्नपतिः। रयिम्- अन्नम्। दधातु- यच्छतु। देवी- द्योतनशीला। अनर्वा-

Dr. Rangan
WEBOLIM

अप्रतिकूला । अदितिः- अखण्डप्रकृतिः । अवतु- रक्षतु । विदथे- यज्ञे । सुवीराः- शोभनवीर्यसम्पन्ना वयम् । बृहत्- तत्त्वम् । वदेम- ब्रवाम ॥६ ॥

Dr. Ranganji
WEBOLIM